ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

# (वाक्य सहित)

# पञ्चमकाण्डे सप्तमः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **May 31, 2021**

# Version Notes:

**This is now the current Version 1.0 dated May 31, 2021.**

1. This replaces the earlier version 0.1 dated May 31, 2020.

2. This version has been updated with the errors found and reported till May 31, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st August 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 30th September 2019 |
| 4th | Version Number | 0.1 dated 31st May 2020 |

# Table of Contents

5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं 4

**5.7 पञ्चमकाण्डे सप्तमः प्रश्नः– उपानुवाक्यावशिष्टकर्मनिरूपणं ........................................ 4**

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः , हरिः ओं

# 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं

## 5.7 पञ्चमकाण्डे सप्तमः प्रश्नः– उपानुवाक्यावशिष्टकर्मनिरूपणं

**TS 5.7.1.1**

यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो वृश्च्यते पापीयान्
भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्या
गायत्रिया प्रथमां चितिमभि मृशेत् त्रिष्टुभा द्वितीयां जगत्या
तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं ँयथादेवतमेवाग्निं चिनुते
न देवताभ्य आ वृश्च्यते वसीयान् भवतीडायै वा एषा विभक्तिः पशव
इडा पशुभिरेनं– [ ] 1

**TS 5.7.1.1 - Padam**

यः । वै । अयथादेवतमित्ययथा–देवतम् । अग्निम् । चिनुते । एति ।
देवताभ्यः । वृश्च्यते । पापीयान् । भवति । यः । यथादेवतमिति
यथा – देवतम् । न । देवताभ्यः । एति । वृश्च्यते । वसीयान् ।
भवति । आग्नेय्या । गायत्रिया । प्रथमाम् । चितिम् । अभीति ।
मृशेत् । त्रिष्टुभाः । द्वितीयाम् । जगत्या । तृतीयाम् ।
अनुष्टुभेत्यनु – स्तुभा । चतुर्थीम् । पङ्क्त्या । पञ्चमीम् ।
यथादेवतमिति यथा – देवतम् । एव । अग्निम् । चिनुते । न ।
देवताभ्यः । एति । वृश्च्यते । वसीयान् । भवति । इडायै । वै । एषा ।
विभक्तिरिति वि – भक्तिः । पशवः । इडा । पशुभिरिति पशु–भिः ।
एनम् । **1 (50)**

**TS 5.7.1.2**

चिनुते यो वै प्रजापतये प्रति प्रोच्याग्निं चिनोति नाऽऽर्तिमार्च्छे–
त्यश्वा–वभित–स्तिष्ठेतां कृष्ण उत्तरतः श्वेतो दक्षिण–स्ता–
वालभ्येष्टका उप दद्ध्यादेतद्–वै प्रजापते रूपं प्राजापत्यो ऽश्वः

साक्षादेव प्रजापतये प्रतिप्रोच्याग्निं चिनोति नाऽऽर्तिमार्च्छत्येतद्–वा

अह्नो रूपं ँयच्छ्वेतोऽश्वो रात्रियै कृष्ण एतदह्नो– [ ] 2

**TS 5.7.1.2 - Padam**

चिनुते । यः । वै । प्रजापतय इति प्रजा – पतये । प्रतिप्रोच्येति

प्रति – प्रोच्य । अग्निम् । चिनोति । न । आर्तिम् । एति । ऋच्छति ।

अश्वौ । अभितः । तिष्ठेताम् । कृष्णः । उत्तरत इत्युत् – तरतः ।

श्वेतः । दक्षिणः । तौ । आलभ्येत्या – लभ्य । इष्टकाः । उपेति ।

दद्ध्यात् । एतत् । वै । प्रजापतेरिति प्रजा – पतेः । रूपम् ।

प्राजापत्य इति प्राजा – पत्यः । अश्वः । साक्षादिति स – अक्षात् ।

एव । प्रजापतय इति प्रजा – पतये । प्रतिप्रोच्येति प्रति – प्रोच्य ।

अग्निम् । चिनोति । न । आर्तिम् । एति । ऋच्छति । एतत् । वै ।

अह्नः । रूपम् । यत् । श्वेतः । अश्वः । रात्रियै । कृष्णः । एतत् ।

अह्नः । **2 (50)**

**TS 5.7.1.3**

रूपं ँयदिष्टका रात्रियै पुरीषमिष्टका उपधास्यञ्छ्वेत–मश्वमभि मृशेत्

पुरीष–मुपधास्यन् कृष्ण–महोरात्राभ्या–मेवैनं चिनुते हिरण्यपात्रं

मधोः पूर्णं ददाति मधव्यो ऽसानीति सौर्या चित्रवत्या ऽवेक्षते

चित्रमेव भवति मद्ध्यन्दिने ऽश्वमव घ्रापयत्यसौ वा आदित्य इन्द्र

एष प्रजापतिः प्राजापत्यो ऽश्वस्तमेव साक्षादृद्ध्नोति ॥ 3

**TS 5.7.1.3 - Padam**

रूपम् । यत् । इष्टकाः । रात्रियै । पुरीषम् । इष्टकाः ।

उपधास्यन्नित्युप – धास्यन्न् । श्वेतम् । अश्वम् । अभीति । मृशेत् ।

पुरीषम् । उपधास्यन्नित्युप – धास्यन्न् । कृष्णम् ।

अहोरात्राभ्यामित्यहः – रात्राभ्याम् । एव । एनम् । चिनुते ।

हिरण्यपात्रमिति हिरण्य–पात्रम् । मधोः । पूर्णम् । ददाति । मधव्यः ।

असानि । इति । सौर्या । चित्रवत्येति चित्र–वत्या । अवेति । ईक्षते ।

चित्रम् । एव । भवति । मद्ध्यन्दिने । अश्वम् । अवेति । घ्रापयति ।

असौ । वै । आदित्यः । इन्द्रः । एषः । प्रजापतिरिति प्रजा–पतिः ।

प्राजापत्य इति प्राजा – पत्यः । अश्वः । तम् । एव ।

साक्षादिति स – अक्षात् । ऋद्ध्नोति ॥ **3 (48)**

*(एन – मेतदह्नो – ऽष्टाचत्वारिꣳशच्च) (A1)*

**TS 5.7.2.1**

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागां ।

अस्थूरि णो गार्.हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा सꣳ शिशाधि ॥

पशवो वा एते यदिष्टका श्चित्यांचित्या–मृषभमुप दधाति

मिथुनमेवास्य तद्–यज्ञे करोति प्रजननाय तस्माद्–यूथेयूथ ऋषभः ॥

सꣳवथ्सरस्य प्रतिमां ꣳयां त्वा रात्र्युपासते ।

प्रजाꣳ सुवीरां कृत्वा विश्वमायुर्व्यश्ऽवत् ॥

प्राजापत्या– [ ] **4**

**TS 5.7.2.1 - Padam**

त्वाम् । अग्ने । वृषभम् । चेकितानम् । पुनः । युवानम् । जनयन्न् ।

उपागामित्युप– आगाम् ॥ अस्थूरि । नः । गार्.हपत्यानीति

गार्.ह – पत्यानि । सन्तु । तिग्मेन । नः । ब्रह्मणा । समिति ।

शिशाधि ॥ पशवः । वै । एते । यत् । इष्टकाः ।

चित्यांचित्यामिति चित्यां – चित्याम् । ऋषभम् । उपेति । दधाति ।

मिथुनम् । एव । अस्य । तत् । यज्ञे । करोति । प्रजननायेति

प्र – जननाय । तस्मात् । यूथेयूथ इति यूथे – यूथे । ऋषभः ॥

सँवथ्सरस्येति सं – वथ्सरस्य । प्रतिमामिति प्रति – माम् । याम् ।

त्वा । रात्रि । उपासत इत्युप – आसते ॥ प्रजामिति प्र– जाम् ।

सुवीरामिति सु – वीराम् । कृत्वा । विश्वम् । आयुः । वीति ।

अश्ञवत् ॥ प्राजापत्यामिति प्राजा – पत्याम् । **4 (50)**

**<u>TS 5.7.2.2</u>**

–मेतामुप दधातीयं ँवावैषैकाष्टका यदेवैकाष्टकायामन्नं

क्रियते तदेवैतया ऽव रुन्ध एषा वै प्रजापतेः कामदुघा तयैव

यजमानो ऽमुष्मिन् ँलोके ऽग्निं दुहे येन देवा ज्योतिषोर्द्ध्वा

उदायन् येनाऽऽदित्या वसवो येन रुद्राः ।

येनाङ्गिरसो महिमान–मानशु–स्तेनैतु यजमानः स्वस्ति ॥

सुवर्गाय वा एष लोकाय – [ ] **5**

**TS 5.7.2.2 - Padam**

एताम् । उपेति । दधाति । इयम् । वाव । एषा ।

एकाष्टकेत्येक – अष्टका । यत् । एव ।

एकाष्टकायामित्येक – अष्टकायाम् । अन्नम् । क्रियते । तत् । एव ।

एतया । अवेति । रुन्धे । एषा । वै । प्रजापतेरिति प्रजा – पतेः ।

कामदुघेति काम – दुघा । तया । एव । यजमानः । अमुष्मिन्न् ।

लोके । अग्निम् । दुहे । येन । देवाः । ज्योतिषा । ऊर्द्ध्वाः ।

उदायन्नित्युत् – आयन्न् । येन । आदित्याः । वसवः । येन । रुद्राः ॥

येन । अङ्गिरसः । महिमानम् । आनशुः । तेन । एतु । यजमानः ।

स्वस्ति ॥ सुवर्गायेति सुवः – गाय । वै । एषः । लोकाय । **5 (50)**

**TS 5.7.2.3**

चीयते यदग्निर्येन देवा ज्योतिषोर्द्ध्वा उदायन्नित्युख्यꣳ स–मिन्ध

इष्टका एवैता उप धत्ते वानस्पत्याः सुवर्गस्य लोकस्य समष्ट्यै

शतायुधाय शतवीर्याय शतोतये ऽभिमातिषाहे ।

शतं ँयो नः शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा ॥

ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।

तेषां ँयो अज्यानि–मजीति–मावहात् तस्मै नो देवाः – [ ] 6

**TS 5.7.2.3 - Padam**

चीयते । यत् । अग्निः । येन । देवाः । ज्योतिषा । उर्द्ध्वाः ।

उदायन्नित्युत्–आयन्न् । इति । उख्यम् । समिति । इन्धे । इष्टकाः ।

एव । एताः । उपेति । धत्ते । वानस्पत्याः । सुवर्गस्येति

सुवः–गस्य । लोकस्य । समष्ट्या इति सं – अष्ट्यै । शतायुधायेति

शत – आयुधाय । शतवीर्यायेति शत – वीर्याय । शतोतय इति

शत – ऊतये । अभिमातिषाह इत्यभिमाति – साहे ॥ शतम् । यः ।

नः । शरदः । अजीतान् । इन्द्रः । नेषत् । अतीति । दुरितानीति

दुः – इतानि । विश्वा ॥ ये । चत्वारः । पथयः । देवयाना इति

देव – यानाः । अन्तरा । द्यावापृथिवी इति द्यावा – पृथिवी ।

वियन्तीति वि – यन्ति ॥ तेषाम् । यः । अज्यानिम् । अजीतिम् ।

आवहादित्या – वहात् । तस्मै । नः । देवाः । 6 (50)

**TS 5.7.2.4**

परि दत्तेह सर्वे ॥

ग्रीष्मो हेमन्त उत नो वसन्तः शरद् वर्.षाः सुवितं नो अस्तु ।

तेषामृतूना७ँ शतशारदानां निवात एषामभये स्याम ॥

इदुवथ्सराय परिवथ्सराय संवँथ्सराय कृणुता बृहन्नमः ।

तेषां ँवय७ँ सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम ॥

भद्रान्नः श्रेयः स–मनैष्ट देवा–स्त्वया ऽवसेन स–मशीमहि त्वा ।

स नो मयो भूः पितो– [ ] 7

**TS 5.7.2.4 - Padam**

परीति । दत्त । इह । सर्वे ॥ ग्रीष्मः । हेमन्तः । उत । नः । वसन्तः ।

शरत् । वर्.षाः । सुवितम् । नः । अस्तु ॥ तेषाम् । ऋतूनाम् ।

शतशारदानामिति शत – शारदानाम् । निवात इति नि – वाते ।

एषाम् । अभये । स्याम ॥ इदुवथ्सरायेतीदु – वथ्सराय ।

परिवथ्सरायेति परि – वथ्सराय । सँवथ्सरायेति सं – वथ्सराय ।

कृणुत । बृहत् । नमः ॥ तेषाम् । वयम् । सुमताविति सु – मतौ ।

यज्ञियानाम् । ज्योक् । अजीताः । अहताः । स्याम ॥ भद्रात् । नः । श्रेयः । समिति । अनैष्ट । देवाः । त्वया । अवसेन । समिति । अशीमहि । त्वा ॥ सः । नः । मयोभूरिति मयः–भूः । पितो इति । **7 (50)**

**TS 5.7.2.5**

आ विशस्व शं तोकाय तनुवे स्योनः ॥

अज्यानी–रेता उप दधात्येता वै देवता अपराजिता–स्ता एव प्र विशति नैव जीयते ब्रह्मवादिनो वदन्ति यदर्द्धमासा मासा ऋतवः सँवथ्सर ओषधीः पचन्त्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणं नि–रुप्यत इत्येता हि तद्–देवता उदजयन्. यदृतुभ्यो निर्वपेद् देवताभ्यः समदं दद्ध्यादाग्रयणं ( ) निरुप्यैता आहुती र्जुहोत्यर्द्धमासानेव मासानृतून्थ् सँवथ्सरं प्रीणाति न देवताभ्यः समदं दधाति भद्रान्नः श्रेयः समनैष्ट देवा इत्याह हुताद्याय यजमानस्यापराभावाय ॥ **8**

**TS 5.7.2.5 - Padam**

एति । विशस्व । शम् । तोकाय । तनुवे । स्योनः ॥ अज्यानीः ।
एताः । उपेति । दधाति । एताः । वै । देवताः ।
अपराजिता इत्यपरा – जिताः । ताः । एव । प्रेति । विशति । न ।
एव । जीयते । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । यत् ।
अर्द्धमासा इत्यर्द्ध – मासाः । मासाः । ऋतवः । सँवथ्सर इति
सं – वथ्सरः । ओषधीः । पचन्ति । अथ । कस्मात् । अन्याभ्यः ।
देवताभ्यः । आग्रयणम् । निरिति । उप्यते । इति । एताः । हि । तत् ।
देवताः । उदजयन्नित्युत् – अजयन्न् । यत् । ऋतुभ्य इत्यृतु–भ्यः ।
निर्वपेदिति निः – वपेत् । देवताभ्यः । समदमिति स – मदम् ।
दद्ध्यात् । आग्रयणम् ( ) । निरुप्येति निः – उप्य । एताः ।
आहुतीरित्या– हुतीः । जुहोति । अर्धमासानित्यर्ध – मासान् ।
एव । मासान् । ऋतून् । सँवथ्सरमिति सं – वथ्सरम् । प्रीणाति ।
न । देवताभ्यः । समदमिति स – मदम् । दधाति । भद्रात् । नः ।

श्रेयः । समिति । अनैष्ट । देवाः । इति । आह । हुताद्यायेति हुत – अद्याय । यजमानस्य । अपराभावायेत्यपरा – भावाय ॥ **8 (75)**

*(प्रजापत्यां – ल्ँलोकाय – देवाः – पितो – दध्यादाग्रयणं – पञ्चविꣳशतिश्च) (A2)*

**TS 5.7.3.1**

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः ।

यो नः पुरस्ताद् दक्षिणतः पश्चा–दुत्तरतो–ऽघायु–रभिदासत्येतꣳ

सो ऽश्मानमृच्छतु ॥

देवासुराः सँयत्ता आसन् तेऽसुरा दिग्भ्य आऽबाधन्त तान् देवा इष्वा च वज्रेण चापानुदन्त यद्–वज्रिणी–रुपदधातीष्वा चैव तद्–वज्रेण च यजमानो भ्रातृव्यानप नुदते दिक्षूप – [ ] **9**

**TS 5.7.3.1 - Padam**

इन्द्रस्य । वज्रः । असि । वार्त्रघ्न इति वार्त्र – घ्नः । तनूपा इति तनू – पाः । नः । प्रतिस्पश इति प्रति – स्पशः ॥ यः । नः । पुरस्तात् । दक्षिणतः । पश्चात् । उत्तरत इत्युत् – तरतः ।

अघायुरित्यघ – युः । अभिदासतीत्यभि – दासति । एतम् । सः ।
अश्मानम् । ऋच्छतु ॥ देवासुरा इति देव – असुराः ।
सँयत्ता इति सं – यत्ताः । आसन्न् । ते । असुराः । दिग्भ्य इति
दिक्–भ्यः । एति । अबाधन्त । तान् । देवाः । इष्वा । च । वज्रेण ।
च । अपेति । अनुदन्त । यत् । वज्रिणीः । उपदधातीत्युप–दधाति ।
इष्वा । च । एव । तत् । वज्रेण । च । यजमानः । भ्रातृव्यान् ।
अपेति । नुदते । दिक्षु । उपेति । **9 (50)**

**TS 5.7.3.2**

दधाति देवपुरा एवैतास्तनूपानीः पर्यूहते ऽग्नाविष्णू सजोषसेमा
वर्द्धन्तु वां गिरः ।
द्युम्नैर्वाजेभिरा गतं ॥
ब्रह्मवादिनो वदन्ति यन्न देवतायै जुह्वत्यथ किंदेवत्या
वसोर्द्धारेत्यग्नि–र्वसुस्तस्यैषा धारा विष्णु–र्वसुस्तस्यैषा धारा
ऽऽग्नावैष्णव्यर्चा वसोर्द्धारां जुहोति भागधेयेनैवैनौ समर्द्धयत्यथो
एता– [ ] 10

**TS 5.7.3.2 - Padam**

दधाति । देवपुरा इति देव – पुराः । एव । एताः । तनूपानीरिति

तनू – पानीः । परीति । ऊहते । अग्नाविष्णू इत्यग्ना – विष्णू ।

सजोषसेति स – जोषसा । इमाः । वर्द्धन्तु । वाम् । गिरः ॥

द्युम्नैः । वाजेभिः । एति । गतम् ॥ ब्रह्मवादिन इति ब्रह्म – वादिनः ।

वदन्ति । यत् । न । देवतायै । जुह्वति । अथ । किंदेवत्येति

किं – देवत्या । वसोः । धारा । इति । अग्निः । वसुः । तस्य ।

एषा । धारा । विष्णुः । वसुः । तस्य । एषा । धारा ।

आग्नावैष्णव्येत्याग्ना – वैष्णव्या । ऋचा । वसोः । धाराम् । जुहोति ।

भागधेयेनेति भाग – धेयेन । एव । एनौ । समिति । अर्द्धयति ।

अथो इति । एताम् । **10 (50)**

**TS 5.7.3.3**

–मेवाहुति–मायतनवतीं करोति यत्काम एनां जुहोति तदेवाव रुन्धे

रुद्रो वा एष यदग्नि–स्तस्यैते तनुवौ घोरा ऽन्या शिवा ऽन्या

यच्छतरुद्रीयं जुहोति यैवास्य घोरा तनूस्तां तेन शमयति

यद्–वसोर्द्धारां जुहोति यैवास्य शिवा तनूस्तां तेन प्रीणाति
यो वै वसोर्द्धारायै–[ ] **11**

**TS 5.7.3.3 - Padam**

एव । आहुतिमित्या – हुतिम् । आयतनवतीमित्यायतन – वतीम् ।
करोति । यत्काम इति यत् – कामः । एनाम् । जुहोति । तत् ।
एव । अवेति । रुन्धे । रुद्रः । वै । एषः । यत् । अग्निः । तस्य ।
एते इति । तनुवौ । घोरा । अन्या । शिवा । अन्या । यत् ।
शतरुद्रीयमिति शत–रुद्रीयम् । जुहोति । या । एव । अस्य । घोरा ।
तनूः । ताम् । तेन । शमयति । यत् । वसोः । धाराम् । जुहोति ।
या । एव । अस्य । शिवा । तनूः । ताम् । तेन । प्रीणाति । यः । वै ।
वसोः । धारायै । **11 (50)**

**TS 5.7.3.4**

प्रतिष्ठां ँवेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन्
ब्रह्मौदनं पचेत् तं ब्राह्मणाश्चत्वारः प्राश्नीयु–रेष वा
अग्निर्वैश्वानरो यद्ब्राह्मण एषा खलु वा अग्नेः प्रिया

तनूर्यद्–वैश्वानरः प्रियायामेवैनां तनुवां प्रति ष्ठापयति चतस्रो धेनूर्दद्यात् ताभिरेव यजमानो ऽमुष्मिन् ँल्लोके ऽग्निं दुहे ॥ **12**

**TS 5.7.3.4 - Padam**

प्रतिष्ठामिति प्रति – स्थाम् । वेद । प्रतीति । एव । तिष्ठति । यत् । आज्यम् । उच्छिष्येतेत्युत् – शिष्येत । तस्मिन्न् । ब्रह्मौदनमिति ब्रह्म – ओदनम् । पचेत् । तम् । ब्राह्मणाः । चत्वारः । प्रेति । अश्ञीयुः । एषः । वै । अग्निः । वैश्वानरः । यत् । ब्राह्मणः । एषा । खलु । वै । अग्नेः । प्रिया । तनूः । यत् । वैश्वानरः । प्रियायाम् । एव । एनाम् । तनुवाम् । प्रतीति । स्थापयति । चतस्रः । धेनूः । दद्यात् । ताभिः । एव । यजमानः । अमुष्मिन्न् । लोके । अग्निम् । दुहे ॥ **12 (46)**

*(उपै – तां – धारायै – षट्चत्वारिꣳशच्च) (A3)*

**TS 5.7.4.1**

चित्तिं जुहोमि मनसा घृतेनेत्याहादाभ्या वै नामैषाऽऽहुतिर्वैश्वकर्मणी नैनं चिक्यानं भ्रातृव्यो दभ्नोत्यथो देवता एवाव रुन्धे

ऽग्ने तमद्येति पङ्क्त्या जुहोति पङ्क्त्या ऽऽहुत्या यज्ञमुखमा रभते सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह होत्रा एवाव रुन्धे ऽग्निर्देवेभ्योऽपाक्रामद्–भागधेय–[ ] 13

**TS 5.7.4.1 - Padam**

चित्तिम् । जुहोमि । मनसा । घृतेन । इति । आह । अदाभ्या । वै । नाम । एषा । आहुतिरित्या–हुतिः । वैश्वकर्मणीति वैश्व – कर्मणी । न । एनम् । चिक्यानम् । भ्रातृव्यः । दभ्नोति । अथो इति । देवताः । एव । अवेति । रुन्धे । अग्ने । तम् । अद्य । इति । पङ्क्त्या । जुहोति । पङ्क्त्या । आहुत्येत्या – हुत्या । यज्ञमुखमिति यज्ञ – मुखम् । एति । रभते । सप्त । ते । अग्ने । समिध इति सं – इधः । सप्त । जिह्वाः । इति । आह । होत्राः । एव । अवेति । रुन्धे । अग्निः । देवेभ्यः । अपेति । अक्रामत् । भागधेयमिति भाग – धेयम् । 13 (50)

**TS 5.7.4.2**

–मिच्छमान–स्तस्मा एतद्–भागधेयं प्रायच्छन्नेतद्–वा
अग्ने–रग्निहोत्र–मेतर्.हि खलु वा एष जातो यर्.हि सर्वश्चितो
जातायैवास्मा अन्नमपि दधाति स एनं प्रीतः प्रीणाति वसीयान्
भवति ब्रह्मवादिनो वदन्ति यदेष गार्.हपत्यश्चीयते ऽथ
क्वास्याऽऽहवनीय इत्यसावादित्य इति ब्रूयादेतस्मिन्.
हि सर्वाभ्यो देवताभ्यो जुह्वति – [ ] **14**

**TS 5.7.4.2 - Padam**

इच्छमानः । तस्मै । एतत् । भागधेयमिति भाग – धेयम् । प्रेति ।
अयच्छन्न् । एतत् । वै । अग्नेः । अग्निहोत्रमित्यग्नि – होत्रम् ।
एतर्.हि । खलु । वै । एषः । जातः । यर्.हि । सर्वः । चितः ।
जाताय । एव । अस्मै । अन्नम् । अपीति । दधाति । सः । एनम् ।
प्रीतः । प्रीणाति । वसीयान् । भवति । ब्रह्मवादिन इति
ब्रह्म–वादिनः । वदन्ति । यत् । एषः । गार्.हपत्य इति गार्.ह–पत्यः ।
चीयते । अथ । क्व । अस्य । आहवनीय इत्या – हवनीयः । इति ।

अ॒सौ । आ॒दि॒त्यः । इति । ब्रू॒या॒त् । ए॒तस्मिन्न् । हि । सर्वाभ्यः ।

दे॒वताभ्यः । जुह्वति । **14 (50)**

**TS 5.7.4.3**

य ए॒वं ँवि॒द्वान॒ग्निं चि॒नु॒ते सा॒क्षा॒दे॒व दे॒वता ऋद्ध्नो॒त्यग्ने

यशस्वि॒न्. यश॒से–मम॒र्पयेन्द्रा॒वती॒–मपचिती मि॒हाऽऽवह ।

अ॒यं मू॒र्द्धा परमे॒ष्ठी सु॒वर्चाः समा॒नाना–मु॒त्तमश्लोको अस्तु ॥

भ॒द्रं पश्य॒न्त उप से॒दु॒–रग्रे॒ तपो दी॒क्षामृषयः सु॒व॒र्विदः ।

ततः क्ष॒त्रं बल॒मोजश्च जा॒तं त॒दस्मै दे॒वा अ॒भि सं नमन्तु ॥

धा॒ता वि॒धा॒ता प॒रमो– [ ] **15**

**TS 5.7.4.3 - Padam**

यः । ए॒वम् । वि॒द्वान् । अ॒ग्निम् । चि॒नु॒ते । सा॒क्षादिति स – अ॒क्षात् ।

ए॒व । दे॒वताः । ऋ॒द्ध्नो॒ति॒ । अग्ने । य॒श॒स्वि॒न्न् । यशसा । इ॒मम् ।

अ॒र्प॒य । इन्द्रा॒वतीमितीन्द्र – व॒ती॒म् । अपचि॒तीमित्यप – चि॒ती॒म् ।

इ॒ह । एति । व॒ह॒ ॥ अ॒यम् । मू॒र्द्धा । प॒र॒मे॒ष्ठी । सु॒वर्चा॒ इति

सु – वर्चाः । स॒मा॒नानाम् । उ॒त्तमश्लो॒क इत्यु॒त्तम – श्लो॒कः ।

अस्तु ॥ भद्रम् । पश्यन्तः । उपेति । सेदुः । अग्रे । तपः ।
दीक्षाम् । ऋषयः । सुवर्विद इति सुवः – विदः ॥ ततः । क्षत्रम् ।
बलम् । ओजः । च । जातम् । तत् । अस्मै । देवाः । अभि ।
समिति । नमन्तु ॥ धाता । विधातेति वि – धाता । परमा । **15 (50)**

**TS 5.7.4.4**

–त सन्दृक् प्रजापतिः परमेष्ठी विराजा ।
स्तोमाः छन्दाꣳसि निविदो म आहुरेतस्मै राष्ट्रमभि सं नमाम ॥
अभ्यावर्तद्ध्वमुप मेत साकमयꣳ शास्ताऽधिपतिर्वो अस्तु ।
अस्य विज्ञानमनु सꣳ रभद्ध्वमिमं पश्चादनु जीवाथ सर्वे ॥
राष्ट्रभृत एता उप दधात्येषा वा अग्नेश्चिती राष्ट्रभृत् तयैवास्मिन् राष्ट्रं
दधाति ( ) राष्ट्रमेव भवति नास्माद् राष्ट्रं भ्रꣳशते ॥ **16**

**TS 5.7.4.4 - Padam**

उत । सन्दृगिति सं – दृक् । प्रजापतिरिति प्रजा – पतिः । परमेष्ठी ।
विराजेति वि – राजा ॥ स्तोमाः । छन्दाꣳसि । निविद इति
नि – विदः । मे । आहुः । एतस्मै । राष्ट्रम् । अभि । समिति ।

नमाम ॥ अभ्यावर्तद्ध्वमित्यभि – आवर्तद्ध्वम् । उपेति । मा ।
एति । इत । साकम् । अयम् । शास्ता । अधिपतिरित्यधि – पतिः ।
वः । अस्तु ॥ अस्य । विज्ञानमिति वि – ज्ञानम् । अनु । समिति ।
रभद्ध्वम् । इमम् । पश्चात् । अन्विति । जीवाथ । सर्वे ॥
राष्ट्रभृत इति राष्ट्र – भृतः । एताः । उपेति । दधाति । एषा । वै ।
अग्नेः । चितिः । राष्ट्रभृदिति राष्ट्र – भृत् । तया । एव । अस्मिन्न् ।
राष्ट्रम् । दधाति ( ) । राष्ट्रम् । एव । भवति । न । अस्मात् । राष्ट्रम् ।
भ्र॒ꣳशते ॥ **16 (57)**

*(भागधेयं – जुह्वति – परमा – राष्ट्रं दधाति – सप्त च) (A4)*

**TS 5.7.5.1**

यथा वै पुत्रो जातो म्रियत एवं ँवा एष म्रियते यस्याग्निरुख्य
उद्वायति यन्निर्मन्थ्यं कुर्याद्-विच्छिन्द्याद्-भ्रातृव्यमस्मै जनयेथ् स
एव पुनः परीद्ध्यः स्वादेवैनं ँयोनेर्जनयति नास्मै भ्रातृव्यं जनयति
तमो वा एतं गृह्णाति यस्याग्निरुख्य उद्वायति मृत्युस्तमः कृष्णं
ँवासः कृष्णा धेनुर्दक्षिणा तमसै- [ ] **17**

**TS 5.7.5.1 - Padam**

यथा । वै । पुत्रः । जातः । म्रियते । एवम् । वै । एषः । म्रियते ।

यस्य । अग्निः । उख्यः । उद्वायतीयुत् – वायति । यत् ।

निर्मन्थ्यमिति निः – मन्थ्यम् । कुर्यात् । वीति । छिन्द्यात् ।

भ्रातृव्यम् । अस्मै । जनयेत् । सः । एव । पुनः । परीद्ध्य इति

परि–इद्ध्यः । स्वात् । एव । एनम् । योनेः । जनयति । न । अस्मै ।

भ्रातृव्यम् । जनयति । तमः । वै । एतम् । गृह्णाति । यस्य । अग्निः ।

उख्यः । उद्वायतीत्युत् – वायति । मृत्युः । तमः । कृष्णम् । वासः ।

कृष्णा । धेनुः । दक्षिणा । तमसा । **17 (50)**

**TS 5.7.5.2**

–व तमो मृत्युमप हते हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषैव

तमो ऽप हते ऽथो तेजो वै हिरण्यं तेज एवाऽऽत्मन् धत्ते सुवर्न

घर्मः स्वाहा सुवर्नाऽर्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः

स्वाहा सुवर्न सूर्यः स्वाहा ऽर्को वा एष यदग्निरसावादित्यो–[ ] **18**

**TS 5.7.5.2 - Padam**

एव । तमः । मृत्युम् । अपेति । हते । हिरण्यम् । ददाति । ज्योतिः ।

वै । हिरण्यम् । ज्योतिषा । एव । तमः । अपेति । हते । अथो इति ।

तेजः । वै । हिरण्यम् । तेजः । एव । आत्मन्न् । धत्ते । सुवः । न ।

घर्मः । स्वाहा । सुवः । न । अर्कः । स्वाहा । सुवः । न । शुक्रः ।

स्वाहा । सुवः । न । ज्योतिः । स्वाहा । सुवः । न । सूर्यः । स्वाहा ।

अर्कः । वै । एषः । यत् । अग्निः । असौ । आदित्यः । **18 (50)**

**TS 5.7.5.3**

ऽश्वमेधो यदेता आहुती र्जुहोत्यर्का–श्वमेधयोरेव ज्योतीꣳषि

सं दधात्येष ह त्वा अर्काश्वमेधी यस्यैतदग्नौ क्रियत

आपो वा इदमग्रे सलिलमासीथ् स एतां प्रजापतिः प्रथमां

चितिमपश्यत् तामुपाधत्त तदिय–मभवत् तं ँविश्वकर्माऽब्रवीदुप

त्वा ऽऽ *यानीति नेह लोकोऽस्तीत्य– [ ] **19**

**TS 5.7.5.3 - Padam**

अश्वमेध इत्यश्व – मेधः । यत् । एताः । आहुतीरित्या – हुतीः ।
जुहोति । अर्काश्वमेधयोरित्यर्क – अश्वमेधयोः । एव । ज्योती॑ंषि ।
समिति । दधाति । एषः । ह । तु । वै । अर्काश्वमेधीत्यर्क–अश्वमेधी ।
यस्य । एतत् । अग्नौ । क्रियते । आपः । वै । इदम् । अग्रे ।
सलिलम् । आसीत् । सः । एताम् । प्रजापतिरिति प्रजा – पतिः ।
प्रथमाम् । चितिम् । अपश्यत् । ताम् । उपेति । अधत्त । तत् । इयम् ।
अभवत् । तम् । विश्वकर्मेति विश्व – कर्मा । अब्रवीत् । उपेति । त्वा ।
एति । अयानि । इति । न । इह । लोकः । अस्ति । इति । **19 (50)**

**TS 5.7.5.4**

–ब्रवीथ् स एतां द्वितीयां चितिमपश्यत् तामुपाधत्त तदन्तरिक्षमभवथ्
स यज्ञः प्रजापतिमब्रवीदुप त्वा ऽऽ *यानीति नेह लोकोऽस्तीत्यब्रवीथ्
स विश्वकर्माणमब्रवीदुप त्वा ऽऽ *यानीति केन मोपैष्यसीति
दिश्याभिरित्यब्रवीत् तं दिश्या–भिरुपैत् ता उपाधत्त ता दिशो–[ ] **20**

**TS 5.7.5.4 - Padam**

अब्रवीत् । सः । एताम् । द्वितीयाम् । चितिम् । अपश्यत् । ताम् ।
उपेति । अधत्त । तत् । अन्तरिक्षम् । अभवत् । सः । यज्ञः ।
प्रजापतिमिति प्रजा – पतिम् । अब्रवीत् । उपेति । त्वा । एति ।
अयानि । इति । न । इह । लोकः । अस्ति । इति । अब्रवीत् । सः ।
विश्वकर्माणमिति विश्व–कर्माणम् । अब्रवीत् । उपेति । त्वा । एति ।
अयानि । इति । केन । मा । उपैष्यसीत्युप – ऐष्यसि । इति ।
दिश्याभिः । इति । अब्रवीत् । तम् । दिश्याभिः । उपैदित्युप – ऐत् ।
ताः । उपेति । अधत्त । ताः । दिशः । **20 (50)**

**TS 5.7.5.5**

ऽभवन्थ् स परमेष्ठी प्रजापतिमब्रवीदुप त्वा ऽऽ *यानीति नेह
लोको ऽस्तीत्यब्रवीथ् स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामा
ऽयानीति नेह लोको ऽस्तीत्यब्रूता॒ँ स एतां तृतीयां चितिमपश्यत्
तामुपाधत्त तदसावभवथ् स आदित्यः प्रजापति–
मब्रवीदुप त्वा–[ ] **21**

**TS 5.7.5.5 - Padam**

अभवन्न् । सः । परमेष्ठी । प्रजापतिमिति प्रजा–पतिम् । अब्रवीत् । उपेति । त्वा । एति । अयानि । इति । न । इह । लोकः । अस्ति । इति । अब्रवीत् । सः । विश्वकर्माणमिति विश्व – कर्माणम् । च । यज्ञम् । च । अब्रवीत् । उपेति । वाम् । एति । अयानि । इति । न । इह । लोकः । अस्ति । इति । अब्रूताम् । सः । एताम् । तृतीयाम् । चितिम् । अपश्यत् । ताम् । उपेति । अधत्त । तत् । असौ । अभवत् । सः । आदित्यः । प्रजापतिमिति प्रजा–पतिम् । अब्रवीत् । उपेति । त्वा । **21 (50)**

**TS 5.7.5.6**

ऽऽ *यानीति नेह लोको ऽस्तीत्यब्रवीथ् स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामा ऽयानीति नेह लोको ऽस्तीत्यब्रूता९ँ स परमेष्ठिनमब्रवीदुप त्वा ऽऽ *यानीति केन मोपैष्यसीति लोकंपृणयेत्यब्रवीत् तं ँलोकंपृणयोपैत् तस्मादयातयाम्नी लोकंपृणा ऽयातयामा ह्यसा– [ ] **22**

**TS 5.7.5.6 - Padam**

एति । अयानि । इति । न । इह । लोकः । अस्ति । इति । अब्रवीत् ।

सः । विश्वकर्माणमिति विश्व – कर्माणम् । च । यज्ञम् । च ।

अब्रवीत् । उपेति । वाम् । एति । अयानि । इति । न । इह ।

लोकः । अस्ति । इति । अब्रूताम् । सः । परमेष्ठिनम् । अब्रवीत् ।

उपेति । त्वा । एति । अयानि । इति । केन । मा ।

उपैष्यसीत्युप – ऐष्यसि । इति । लोकंपृणयेति लोकं – पृणया ।

इति । अब्रवीत् । तम् । लोकंपृणयेति लोकं – पृणया ।

उपैदित्युप – ऐत् । तस्मात् । अयातयाम्नीत्ययात – याम्नी ।

लोकंपृणेति लोकं – पृणा । अयातयामेत्ययात – यामा । हि ।

असौ । **22 (50)**

**TS 5.7.5.7**

–वादित्य–स्तानृषयो ऽब्रुवन्नुप व आऽयामेति केन न उपैष्यथेति

भूम्नेत्यब्रुवन् तान् द्वाभ्यां चितीभ्यामुपायन्थ् स पञ्चचितीकः

समपद्यत य एवं ँविद्वानग्निं चिनुते भूयानेव भवत्यभीमान्

ँल्लोकाञ्जयति विदुरेनं देवा अथो एतासामेव देवताना॒ं

सायुज्यं गच्छति ॥ 23

**TS 5.7.5.7 - Padam**

आदित्यः । तान् । ऋषयः । अब्रुवन्न् । उपेति । वः । एति । अयाम ।

इति । केन । नः । उपैष्यथेत्युप – ऐष्यथ । इति । भूम्ना । इति ।

अब्रुवन्न् । तान् । द्वाभ्याम् । चितीभ्यामिति चिति – भ्याम् ।

उपायन्नित्युप – आयन्न् । सः । पञ्चचितीक इति पञ्च–चितीकः ।

समिति । अपद्यत । यः । एवम् । विद्वान् । अग्निम् । चिनुते ।

भूयान् । एव । भवति । अभीति । इमान् । लोकान् । जयति ।

विदुः । एनम् । देवाः । अथो इति । एतासाम् । एव । देवतानाम् ।

सायुज्यम् । गच्छति ॥ 23 (45)

*(तमसा – ऽऽदित्यो – ऽस्तीति – दिश – आदित्यः*

*प्रजापतिमब्रवीदुप त्वा – ऽसौ – पञ्चचत्वारि॒ंशच्च) (A5)*

**TS 5.7.6.1**

वयो वा अग्निर्यदग्निचित् पक्षिणो ऽश्ञीयात् तमेवाग्निमद्यादा–
र्तिमार्च्छेथ् सँवथ्सरं ँव्रतं चरेथ् सँवथ्सर७ं हि व्रतं नाति पशुर्वा
एष यदग्निर्. हिनस्ति खलु वै तं पशुर्य एनं पुरस्तात्
प्रत्यञ्चमुपचरति तस्मात् पश्चात् प्राङुपचर्य आत्मनो ऽहि७ंसायै
तेजो ऽसि तेजो मे यच्छ पृथिवीं ँयच्छ –[ ] **24**

**TS 5.7.6.1 - Padam**

वयः । वै । अग्निः । यत् । अग्निचिदित्यग्नि – चित् । पक्षिणः ।
अश्ञीयात् । तम् । एव । अग्निम् । अद्यात् । आर्तिम् । एति ।
ऋच्छेत् । सँवथ्सरमिति सं – वथ्सरम् । व्रतम् । चरेत् ।
सँवथ्सरमिति सं – वथ्सरम् । हि । व्रतम् । न । अतीति ।
पशुः । वै । एषः । यत् । अग्निः । हिनस्ति । खलु । वै । तम् ।
पशुः । यः । एनम् । पुरस्तात् । प्रत्यञ्चम् ।
उपचरतीत्युप – चरति । तस्मात् । पश्चात् । प्राङ् ।

उपचर्य इत्युप – चर्यः । आत्मनः । अहि॒ꣳसायै । तेजः । असि । तेजः । मे । यच्छ । पृथिवीम् । यच्छ । **24 (50)**

**TS 5.7.6.2**

पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं ँयच्छान्तरिक्षान्मा पाहि सुवरसि सुवर्मे यच्छ दिवं ँयच्छ दिवो मा पाहीत्याहैताभिर्वा इमे लोका विधृता यदेता उपदधात्येषां ँलोकानां ँविधृत्यै स्वयमातृण्णा उपधाय हिरण्येष्टका उपदधातीमे वै लोकाः स्वयमातृण्णा ज्योतिर्.हिरण्यं ँयथ् स्वयमातृण्णा उपधाय– [ ] **25**

**TS 5.7.6.2 - Padam**

पृथिव्यै । मा । पाहि । ज्योतिः । असि । ज्योतिः । मे । यच्छ । अन्तरिक्षम् । यच्छ । अन्तरिक्षात् । मा । पाहि । सुवः । असि । सुवः । मे । यच्छ । दिवम् । यच्छ । दिवः । मा । पाहि । इति । आह । एताभिः । वै । इमे । लोकाः । विधृता इति वि – धृताः । यत् । एताः । उपदधातीत्युप – दधाति । एषाम् । लोकानाम् । विधृत्या इति वि – धृत्यै । स्वयमातृण्णा इति स्वयं – आतृण्णाः ।

उपधायेत्युप – धाय । हिरण्येष्टका इति हिरण्य – इष्टकाः । उपेति ।

दधाति । इमे । वै । लोकाः । स्वयमातृण्णा इति स्वयं–आतृण्णाः ।

ज्योतिः । हिरण्यम् । यत् । स्वयमातृण्णा इति स्वयं – आतृण्णाः ।

उपधायेत्युप – धाय । **25 (50)**

**TS 5.7.6.3**

हिरण्येष्टका उपदधाती–मानेवैताभि–र्लोका–ञ्ज्योतिष्मतः कुरुते ऽथो

एताभिरेवास्मा इमे लोकाः प्र भान्ति यास्ते अग्ने सूर्ये रुच उद्यतो

दिव–मातन्वन्ति रश्मिभिः ।

ताभिः सर्वाभी रुचे जनाय न स्कृधि ॥

या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।

इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥

रुचन्नो धेहि–[ ] **26**

**TS 5.7.6.3 - Padam**

हिरण्येष्टका इति हिरण्य – इष्टकाः । उपदधातीत्युप – दधाति ।

इमान् । एव । एताभिः । लोकान् । ज्योतिष्मतः । कुरुते ।

अथो इति । एताभिः । एव । अस्मै । इमे । लोकाः । प्रेति ।
भान्ति । याः । ते । अग्ने । सूर्ये । रुचः । उद्यत इत्युत् – यतः ।
दिवम् । आतन्वन्तीत्या – तन्वन्ति । रश्मिभिरिति रश्मि – भिः ॥
ताभिः । सर्वाभिः । रुचे । जनाय । नः । कृधि ॥ याः । वः ।
देवाः । सूर्ये । रुचः । गोषु । अश्वेषु । याः । रुचः ॥ इन्द्राग्नी
इतीन्द्र–अग्नी । ताभिः । सर्वाभिः । रुचम् । नः । धत्त । बृहस्पते ॥
रुचम् । नः । धेहि । **26 (50)**

**<u>TS 5.7.6.4</u>**

ब्राह्मणेषु रुचꣳ राजसु न स्कृधि ।
रुचं ँविश्येषु शूद्रेषु मयि धेहि रुचा रुचं ॥
द्वेधा वा अग्निं चिक्यानस्य यश इन्द्रियं गच्छत्यग्निं
ँवा चितमीजानं ँवा यदेता आहुतीर्जुहोत्यात्मन्नेव यश इन्द्रियं धत्त
ईश्वरो वा एष आर्तिमार्तोर्यो ऽग्निं चिन्व–न्नधिक्रामति तत्त्वा यामि
ब्रह्मणा वन्दमान इति वारुण्य–र्चा– [ ] **27**

**TS 5.7.6.4 - Padam**

ब्राह्मणेषु । रुचम् । राजस्विति राज – सु । नः । कृधि ॥ रुचम् ।
विश्येषु । शूद्रेषु । मयि । धेहि । रुचा । रुचम् ॥ द्वेधा । वै ।
अग्निम् । चिक्यानस्य । यशः । इन्द्रियम् । गच्छति । अग्निम् । वा ।
चितम् । ईजानम् । वा । यत् । एताः । आहुतीरित्या – हुतीः ।
जुहोति । आत्मन्न् । एव । यशः । इन्द्रियम् । धत्ते । ईश्वरः । वै ।
एषः । आर्तिम् । आर्तोरित्या – अर्तोः । यः । अग्निम् । चिन्वन्न् ।
अधिक्रामतीत्यधि – क्रामति । तत् । त्वा । यामि । ब्रह्मणा ।
वन्दमानः । इति । वारुण्या । ऋचा । **27 (50)**

**TS 5.7.6.5**

जुहुयाच्छान्ति–रेवैषा ऽग्नेर्गुप्ति–रात्मनो हविष्कृतो वा एष यो ऽग्निं
चिनुते यथा वै हविः स्कन्दत्येवं ँवा एष स्कन्दति यो ऽग्निं चित्वा
स्त्रिय–मुपैति मैत्रावरुण्या ऽऽमिक्षया यजेत मैत्रावरुणता–
मेवोपैत्यात्मनो ऽस्कन्दाय यो वा अग्निमृतुस्थां ँवेदर्तुर्.ऋतुरस्मै
कल्पमान एति प्रत्येव तिष्ठति सँवथ्सरो वा अग्निर्.– [ ] **28**

**TS 5.7.6.5 - Padam**

जुहुयात् । शान्तिः । एव । एषा । अग्नेः । गुप्तिः । आत्मनः ।
हविष्कृत इति हविः – कृतः । वै । एषः । यः । अग्निम् । चिनुते ।
यथा । वै । हविः । स्कन्दति । एवम् । वै । एषः । स्कन्दति । यः ।
अग्निम् । चित्वा । स्त्रियम् । उपैतीत्युप – एति । मैत्रावरुण्येति
मैत्रा – वरुण्या । आमिक्षया । यजेत । मैत्रावरुणतामिति
मैत्रा – वरुणताम् । एव । उपेति । एति । आत्मनः । अस्कन्दाय ।
यः । वै । अग्निम् । ऋतुस्थामित्यृतु – स्थाम् । वेद ।
ऋतुर्.ऋतुरित्यृतुः – ऋतुः । अस्मै । कल्पमानः । एति । प्रतीति ।
एव । तिष्ठति । सँवथ्सर इति सं – वथ्सरः । वै । अग्निः । **28 (50)**

**TS 5.7.6.6**

ऋतुस्थास्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्.षाः
पुच्छ७ँ शरदुत्तरः पक्षो हेमन्तो मद्ध्यं पूर्वपक्षा–श्चितयोऽपरपक्षाः
पुरीष–महोरात्राणीष्टका एष वा अग्निर्. ऋतुस्था य एवं
वेँदर्तुर्.ऋतु–रस्मै कल्पमान एति प्रत्येव तिष्ठति प्रजापतिर्वा

एतं ज्यैष्ठ्यकामो न्यधत्त ततो वै स ज्यैष्ठ्यमगच्छद्–य

एवं ँविद्वानग्निं चिनुते ( ) ज्यैष्ठ्यमेव गच्छति ॥ **29**

**TS 5.7.6.6 - Padam**

ऋतुस्था इत्यृतु – स्थाः । तस्य । वसन्तः । शिरः । ग्रीष्मः ।

दक्षिणः । पक्षः । वर्.षाः । पुच्छम् । शरत् । उत्तर इत्युत् – तरः ।

पक्षः । हेमन्तः । मद्ध्यम् । पूर्वपक्षा इति पूर्व – पक्षाः । चितयः ।

अपरपक्षा इत्यपर – पक्षाः । पुरीषम् । अहोरात्राणीत्यहः–रात्राणि ।

इष्टकाः । एषः । वै । अग्निः । ऋतुस्था इत्यृतु – स्थाः । यः ।

एवम् । वेद । ऋतुर्.ऋतुरित्यृतुः – ऋतुः । अस्मै । कल्पमानः ।

एति । प्रतीति । एव । तिष्ठति । प्रजापतिरिति प्रजा – पतिः । वै ।

एतम् । ज्यैष्ठ्यकाम इति ज्यैष्ठ्य – कामः । नीति । अधत्त । ततः ।

वै । सः । ज्यैष्ठ्यम् । अगच्छत् । यः । एवम् । विद्वान् । अग्निम् ।

चिनुते ( ) । ज्यैष्ठ्यम् । एव । गच्छति ॥ **29 (53)**

*(पृथिवीँ यँच्छ – यथ् स्वयमातृण्णा उपधाय – धेह्यृ – चा – ऽग्नि – श्चिनुते – त्रीणि च) (A6)*

**TS 5.7.7.1**

यदाकूताथ् समसुस्रोद्धृदो वा मनसो वा संभृतं चक्षुषो वा ।

तमनु प्रेहि सुकृतस्य लोकं यँत्रर्.षयः प्रथमजा ये पुराणाः ॥

एत७ सधस्थ परि ते ददामि य–मावहाच्छेवधिं जातवेदाः ।

अन्वागन्ता यज्ञपतिर्वो अत्र त७ स्म जानीत परमे व्योमन्न् ॥

जानीतादेनं परमे व्योमन् देवाः सधस्था विद रूपमस्य ।

यदागच्छात्– [ ] **30**

**TS 5.7.7.1 - Padam**

यत् । आकूतादित्या – कूतात् । समसुस्रोदिति सं – असुस्रोत् ।

हृदः । वा । मनसः । वा । संभृतमिति सं – भृतम् । चक्षुषः ।

वा ॥ तम् । अनु । प्रेति । इहि । सुकृतस्येति सु – कृतस्य ।

लोकम् । यत्र । ऋषयः । प्रथमजा इति प्रथम–जाः । ये । पुराणाः ॥

एतम् । सधस्थेति सध – स्थ । परीति । ते । ददामि । यम् ।

आवहादित्या – वहात् । शेवधिमिति शेव – धिम् । जातवेदा इति जात – वेदाः ॥ अन्वागन्तेत्यनु–आगन्ता । यज्ञपतिरिति यज्ञ–पतिः । वः । अत्र । तम् । स्म । जानीत । परमे । व्योमन्निति वि–ओमन्न् ॥ जानीतात् । एनम् । परमे । व्योमन्निति वि – ओमन्न् । देवाः । सधस्था इति सध – स्थाः । विद । रूपम् । अस्य ॥ यत् । आगच्छादित्या – गच्छात् । **30 (50)**

**<u>TS 5.7.7.2</u>**

पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै ॥

सं प्र च्यवद्ध्वमनु सं प्र यातागने पथो देवयानान् कृणुद्ध्वं ।

अस्मिन्थ् सधस्थे अद्ध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥

प्रस्तरेण परिधिना स्रुचा वेद्या च बर्.हिषा ।

ऋचेमं ँयज्ञं नो वह सुवर्देवेषु गन्तवे ॥

यदिष्टं ँयत् परादानं ँयद्–दत्तं ँया च दक्षिणा ।

त – [ ] **31**

**TS 5.7.7.2 - Padam**

पथिभिरिति पथि – भिः । देवयानैरिति देव – यानैः ।

इष्टापूर्ते इतीष्टा–पूर्ते । कृणुतात् । आविः । अस्मै ॥ सम् । प्रेति ।

च्यवद्ध्वम् । अन्विति । सम् । प्रेति । यात । अग्ने । पथः ।

देवयानानिति देव – यानान् । कृणुद्ध्वम् ॥ अस्मिन्न् ।

सधस्थ इति सध – स्थे । अधीति । उत्तरस्मिन्नित्युत् – तरस्मिन्न् ।

विश्वे । देवाः । यजमानः । च । सीदत ॥ प्रस्तरेणेति प्र – स्तरेण ।

परिधिनेति परि – धिना । स्रुचा । वेद्या । च । बर्.हिषा ॥ ऋचा ।

इमम् । यज्ञम् । नः । वह । सुवः । देवेषु । गन्तवे ॥ यत् । इष्टम् ।

यत् । परादानमिति परा – दानम् । यत् । दत्तम् । या । च । दक्षिणा ॥

तत् । **31 (50)**

**TS 5.7.7.3**

–दग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् ॥

येना सहस्रं ँवहसि येनाग्ने सर्ववेदसं ।

तेनेमं ँयज्ञं नो वह सुवर्देवेषु गन्तवे ॥

येनाग्ने दक्षिणा युक्ता यज्ञं ँवहन्त्यृत्विजः ।
तेनेमं ँयज्ञं नो वह सुवर्देवेषु गन्तवे ॥
येनाग्ने सुकृतः पथा मधोर्धारा व्यानशुः ।
तेनेमं ँयज्ञं नो वह सुवर्देवेषु गन्तवे ( ) ॥
यत्र धारा अनपेता मधोर्घृतस्य च याः ।
तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् ॥ **32**

**<u>TS 5.7.7.3 - Padam</u>**

अग्निः । वैश्वकर्मण इति वैश्व – कर्मणः । सुवः । देवेषु । नः । दधत् ॥ येन । सहस्रम् । वहसि । येन । अग्ने । सर्ववेदसमिति सर्व – वेदसम् ॥ तेन । इमम् । यज्ञम् । नः । वह । सुवः । देवेषु । गन्तवे ॥ येन । अग्ने । दक्षिणाः । युक्ताः । यज्ञम् । वहन्ति । ऋत्विजः ॥ तेन । इमम् । यज्ञम् । नः । वह । सुवः । देवेषु । गन्तवे ॥ येन । अग्ने । सुकृत इति सु – कृतः । पथा । मधोः । धाराः । व्यानशुरिति वि – आनशुः ॥ तेन । इमम् । यज्ञम् ।

नः । वह । सुवः । देवेषु । गन्तवे ( ) ॥ यत्र । धाराः ।

अनपेता इत्यनप – इताः । मधोः । घृतस्य । च । याः ॥ तत् ।

अग्निः । वैश्वकर्मण इति वैश्व – कर्मणः । सुवः । देवेषु । नः ।

दधत् ॥ **32 (64)**

*(आगच्छात् – त – द्वयानशु स्तेनेमं यँज्ञं नो*

*वह सुवर्देवेषु गन्तवे – चतुर्दश च) (A7)*

**TS 5.7.8.1**

या–स्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः ।

ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन्न् ॥

उथ्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते

किं वा न यद्–वा अद्ध्वर्यु–रग्नेश्चिन्वन्न–न्तरेत्यात्मनो वै

तदन्त–रेति यास्ते अग्ने समिधो यानि–[ ] **33**

**TS 5.7.8.1 - Padam**

याः । ते । अग्ने । समिध इति सं – इधः । यानि । धाम । या ।

जिह्वा । जातवेद इति जात–वेदः । यः । अर्चिः ॥ ये । ते । अग्ने ।

मेडयः । ये । इन्दवः । तेभिः । आत्मानम् । चिनुहि । प्रजानन्निति प्र – जानन्न् ॥ उथ्सन्नयज्ञ इत्युथ्सन्न – यज्ञः । वै । एषः । यत् । अग्निः । किम् । वा । अह । एतस्य । क्रियते । किम् । वा । न । यत् । वै । अद्ध्वर्युः । अग्नेः । चिन्वन्न् । अन्तरेतीत्यन्तः – एति । आत्मनः । वै । तत् । अन्तः । एति । याः । ते । अग्ने । समिध इति सं – इधः । यानि । **33 (50)**

**TS 5.7.8.2**

धामेत्याहैषा वा अग्नेः स्वयं चितिरग्निरेव तदग्निं चिनोति नाद्ध्वर्युरात्मनो ऽन्त–रेति चतस्र आशाः प्रचरन्त्वग्नय इमं नो यज्ञं नयतु प्रजानन्न् । घृतं पिन्वन्नजर८ं सुवीरं ब्रह्म समिद्–भवत्याहुतीनां ॥ सुवर्गाय वा एष लोकायोप धीयते यत् कूर्मश्चतस्र आशाः प्र चरन्त्वग्नय इत्याह–[ ] **34**

**TS 5.7.8.2 - Padam**

धाम । इति । आह । एषा । वै । अग्नेः । स्वयंचितिरिति

स्वयं – चितिः । अग्निः । एव । तत् । अग्निम् । चिनोति । न ।

अद्ध्वर्युः । आत्मनः । अन्तः । एति । चतस्रः । आशाः । प्रेति ।

चरन्तु । अग्नयः । इमम् । नः । यज्ञम् । नयतु । प्रजानन्निति

प्र – जानन्न् ॥ घृतम् । पिन्वन्न् । अजरम् । सुवीरमिति सु–वीरम् ।

ब्रह्म । समिदिति सं – इत् । भवति । आहुतीनामित्या – हुतीनाम् ॥

सुवर्गायेति सुवः – गाय । वै । एषः । लोकाय । उपेति । धीयते ।

यत् । कूर्मः । चतस्रः । आशाः । प्रेति । चरन्तु । अग्नयः ।

इति । आह । **34 (50)**

**TS 5.7.8.3**

दिश एवैतेन प्र जानातीमं नो यज्ञं नयतु प्रजानन्नित्याह सुवर्गस्य

लोकस्याभिनीत्यै ब्रह्म समिद्–भवत्याहुतीना–मित्याह ब्रह्मणा वै

देवाः सुवर्गं ँलोकमायन्. यद्–ब्रह्मण्वत्योपदधाति ब्रह्मणैव तद्–

यजमानः सुवर्गं ँलोकमेति प्रजापतिर्वा एष यदग्निस्तस्य प्रजाः

पशवः छन्दा॑ᳪसि रूपᳪ सर्वान् वर्णानिष्टकानां ( ) कुर्याद् रूपेणैव

प्रजां पशून् छन्दा॑ᳪस्यव रुन्धे ऽथो प्रजाभ्य एवैनं पशुभ्यः

छन्दोभ्यो ऽवरुद्ध्य चिनुते ॥ **35**

**TS 5.7.8.3 - Padam**

दिशः । एव । एतेन । प्रेति । जानाति । इमम् । नः । यज्ञम् ।

नयतु । प्रजानन्निति प्र – जानन्न् । इति । आह ।

सुवर्गस्येति सुवः – गस्य । लोकस्य । अभिनीत्या इत्यभि–नीत्यै ।

ब्रह्म । समिदिति सं – इत् । भवति । आहुतीनामित्या – हुतीनाम् ।

इति । आह । ब्रह्मणा । वै । देवाः । सुवर्गमिति सुवः – गम् ।

लोकम् । आयन्न् । यत् । ब्रह्मण्वत्येति ब्रह्मण् – वत्या ।

उपदधातीत्युप – दधाति । ब्रह्मणा । एव । तत् । यजमानः ।

सुवर्गमिति सुवः – गम् । लोकम् । एति ।

प्रजापतिरिति प्रजा – पतिः । वै । एषः । यत् । अग्निः । तस्य ।

प्रजा इति प्र – जाः । पशवः । छन्दा॑ᳪसि । रूपम् । सर्वान् ।

वर्णान् । इष्टकानाम् ( ) । कुर्यात् । रूपेण । एव । प्रजामिति प्र - जाम् । पशून् । छन्दाꣳसि । अवेति । रुन्धे । अथो इति । प्रजाभ्य इति प्र - जाभ्यः । एव । एनम् । पशुभ्य इति पशु-भ्यः । छन्दोभ्य इति छन्दः - भ्यः । अवरुद्ध्येत्यव - रुद्ध्य । चिनुते ॥ **35 (66)**

*(यान्य - ग्नय इत्याहे - ष्टकानाꣳ - षोडश च) (A8)*

**TS 5.7.9.1**

मयि गृह्णाम्यग्रे अग्निꣳ राय स्पोषाय सुप्रजास्त्वाय सुवीर्याय । मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः ॥ यो नो अग्निः पितरो हृथ्स्वन्त-रमर्त्यो मर्त्याꣳ आविवेश । तमात्मन् परि गृह्णीमहे वयं मा सो अस्माꣳ अवहाय परा गात् ॥ यदद्ध्वर्यु-रात्मन्नग्निम-गृहीत्वाऽग्निं चिनुयाद्-यो ऽस्य स्वो ऽग्नि-स्तमपि - [ ] **36**

**TS 5.7.9.1 - Padam**

मयि । गृह्णामि । अग्रे । अग्निम् । रायः । पोषाय । सुप्रजास्त्वायेति सुप्रजाः – त्वाय । सुवीर्यायेति सु – वीर्याय ॥ मयि । प्रजामिति प्र – जाम् । मयि । वर्चः । दधामि । अरिष्टाः । स्याम । तनुवा । सुवीरा इति सु – वीराः ॥ यः । नः । अग्निः । पितरः । हृथ्स्विति हृत् – सु । अन्तः । अमर्त्यः । मर्त्यान् । आविवेशेत्या – विवेश ॥ तम् । आत्मन्न् । परीति । गृह्णीमहे । वयम् । मा । सः । अस्मान् । अवहायेत्यव – हाय । परेति । गात् ॥ यत् । अद्ध्वर्युः । आत्मन्न् । अग्निम् । अगृहीत्वा । अग्निम् । चिनुयात् । यः । अस्य । स्वः । अग्निः । तम् । अपीति । **36 (50)**

**TS 5.7.9.2**

यजमानाय चिनुयादग्निं खलु वै पशवोऽनूप तिष्ठन्ते ऽपक्रामुका अस्मात् पशवः स्युर्मयि गृह्णाम्यग्रे अग्नि–मित्याहाऽऽत्मन्नेव स्वमग्निं दाधार नास्मात् पशवो ऽप क्रामन्ति ब्रह्मवादिनो वदन्ति

यन्मृच्चाऽऽप–श्चाग्ने–रनाद्य–मथ कस्मान्मृदा चाद्भि–श्चाग्नि–श्चीयत

इति यदद्भिः सँयौ – [ ] 37

**TS 5.7.9.2 - Padam**

यजमानाय । चिनुयात् । अग्निम् । खलु । वै । पशवः । अनु ।

उपेति । तिष्ठन्ते । अपक्रामुका इत्यप – क्रामुकाः । अस्मात् ।

पशवः । स्युः । मयि । गृह्णामि । अग्रे । अग्निम् । इति । आह ।

आत्मन्न् । एव । स्वम् । अग्निम् । दाधार । न । अस्मात् । पशवः ।

अपेति । क्रामन्ति । ब्रह्मवादिन इति ब्रह्म–वादिनः । वदन्ति । यत् ।

मृत् । च । आपः । च । अग्नेः । अनाद्यम् । अथ । कस्मात् ।

मृदा । च । अद्भिरित्यत्–भिः । च । अग्निः । चीयते । इति । यत् ।

अद्भिरित्यत् – भिः । सँयौतीति सं – यौति । 37 (50)

**TS 5.7.9.3**

–त्यापो वै सर्वा देवता देवताभिरेवैन᳚ स᳚ सृजति

यन्मृदा चिनोतीयँ वा अग्निर्वैश्वानरोऽग्निनैव तदग्निं चिनोति

ब्रह्मवादिनो वदन्ति यन्मृदा चाद्भि–श्चाग्नि–श्चीयते ऽथ

कस्मादग्नि–रुच्यत इति यच्छन्दोभि–श्चिनोत्यग्नयो वै छन्दाꣳसि
तस्मादग्नि–रुच्यते ऽथो इयं ँवा अग्निर्वैश्वानरो य – [ ] **38**

**TS 5.7.9.3 - Padam**

आपः । वै । सर्वाः । देवताः । देवताभिः । एव । एनम् । समिति ।
सृजति । यत् । मृदा । चिनोति । इयम् । वै । अग्निः । वैश्वानरः ।
अग्निना । एव । तत् । अग्निम् । चिनोति । ब्रह्मवादिन इति
ब्रह्म – वादिनः । वदन्ति । यत् । मृदा । च । अद्भिरित्यत् – भिः ।
च । अग्निः । चीयते । अथ । कस्मात् । अग्निः । उच्यते । इति ।
यत् । छन्दोभिरिति छन्दः – भिः । चिनोति । अग्नयः । वै ।
छन्दाꣳसि । तस्मात् । अग्निः । उच्यते । अथो इति । इयम् । वै ।
अग्निः । वैश्वानरः । यत् । **38 (50)**

**TS 5.7.9.4**

–न्मृदा चिनोति तस्मादग्निरुच्यते हिरण्येष्टका उप दधाति ज्योतिर्वै
हिरण्यं ज्योतिरेवा ऽस्मिन् दधात्यथो तेजो वै हिरण्यं तेज एवाऽऽत्मन्
धत्ते यो वा अग्निꣳ सर्वतोमुखं चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा

दिशो ऽभि जयति गायत्रीं पुरस्तादुप दधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मद्ध्य एष वा ( ) अग्निः सर्वतोमुखस्तं ँय एवं ँविद्वा७ – श्चिनुते सर्वासु प्रजास्वन्नमत्ति

सर्वा दिशो ऽभि जयत्यथो दिश्येव दिशं प्र वयति तस्माद्–दिशि दिक् प्रोता ॥ **39**

**TS 5.7.9.4 - Padam**

मृदा । चिनोति । तस्मात् । अग्निः । उच्यते । हिरण्येष्टका इति हिरण्य – इष्टकाः । उपेति । दधाति । ज्योतिः । वै । हिरण्यम् । ज्योतिः । एव । अस्मिन्न् । दधाति । अथो इति । तेजः । वै । हिरण्यम् । तेजः । एव । आत्मन्न् । धत्ते । यः । वै । अग्निम् । सर्वतोमुखमिति सर्वतः – मुखम् । चिनुते । सर्वासु । प्रजास्विति प्र – जासु । अन्नम् । अत्ति । सर्वाः । दिशः । अभीति । जयति । गायत्रीम् । पुरस्तात् । उपेति । दधाति । त्रिष्टुभम् । दक्षिणतः । जगतीम् । पश्चात् । अनुष्टुभमित्यनु–स्तुभम् । उत्तरत इत्युत्–तरतः ।

पङ्क्तिम् । मद्ध्ये । एषः । वै ( ) । अग्निः । सर्वतोमुख इति
सर्वतः - मुखः । तम् । यः । एवम् । विद्वान् । चिनुते । सर्वासु ।
प्रजास्विति प्र-जासु । अन्नम् । अत्ति । सर्वाः । दिशः । अभीति ।
जयति । अथो इति । दिशि । एव । दिशम् । प्रेति । वयति ।
तस्मात् । दिशि । दिक् । प्रोतेति प्र - उता ॥ **39 (75)**

*(अपि-सँयौति-वैश्वानरो य-देष वै-पञ्चविꣳशतिश्च) (A9)*

**TS 5.7.10.1**

प्रजापतिरग्निमसृजत सो ऽस्माथ् सृष्टः प्राङ् प्राऽद्रवत् तस्मा
अश्वं प्रत्यास्यथ् स दक्षिणा ऽऽ *वर्तत तस्मै वृष्णिं प्रत्यास्यथ्
स प्रत्यङ्ङावर्तत तस्मा ऋषभं प्रत्यास्यथ् स उदङ्ङावर्तत
तस्मै बस्तं प्रत्यास्यथ् स ऊर्द्ध्वो ऽद्रवत् तस्मै पुरुषं
प्रत्यास्यद्-यत् पशुशीर्.षाण्युपदधाति सर्वत एवैन-[ ] **40**

**TS 5.7.10.1 - Padam**

प्रजापतिरिति प्रजा - पतिः । अग्निम् । असृजत । सः । अस्मात् ।
सृष्टः । प्राङ् । प्रेति । अद्रवत् । तस्मै । अश्वम् । प्रतीति । आस्यत् ।

सः । दक्षिणा । एति । अवर्तत । तस्मै । वृष्णिम् । प्रतीति ।

आस्यत् । सः । प्रत्यङ् । एति । अवर्तत । तस्मै । ऋषभम् ।

प्रतीति । आस्यत् । सः । उदङ् । एति । अवर्तत । तस्मै । बस्तम् ।

प्रतीति । आस्यत् । सः । ऊर्द्ध्वः । अद्रवत् । तस्मै । पुरुषम् ।

प्रतीति । आस्यत् । यत् । पशुशीर्.षाणीति पशु – शीर्.षाणि ।

उपदधातीत्युप – दधाति । सर्वतः । एव । एनम् । **40 (50)**

**TS 5.7.10.2**

मवरुद्ध्य चिनुत एता वै प्राणभृत–श्चक्षुष्मतीरिष्टका यत्

पशुशीर्.षाणि यत् पशुशीर्.षाण्युपदधाति ताभिरेव यजमानो ऽमुष्मिन्

ँल्लोके प्राणित्यथो ताभिरेवास्मा इमे लोकाः प्र भान्ति मृदा ऽभिलिप्योप

दधाति मेद्ध्यत्वाय पशुर्वा एष यदग्निरन्नं पशव एष खलु वा

अग्निर्यत् पशुशीर्.षाणि यं कामयेत कनीयो ऽस्यान्न७ँ – [ ] **41**

**TS 5.7.10.2 - Padam**

अवरुद्ध्येत्यव – रुद्ध्य । चिनुते । एताः । वै ।

प्राणभृत इति प्राण – भृतः । चक्षुष्मतीः । इष्टकाः । यत् ।

पशुशीर्.षाणीति पशु – शीर्.षाणि । यत् । पशुशीर्.षाणीति

पशु – शीर्.षाणि । उपदधातीत्युप – दधाति । ताभिः । एव ।

यजमानः । अमुष्मिन्न् । लोके । प्रेति । अनिति । अथो इति ।

ताभिः । एव । अस्मै । इमे । लोकाः । प्रेति । भान्ति । मृदा ।

अभिलिप्येत्यभि – लिप्य । उपेति । दधाति । मेद्ध्यत्वायेति

मेद्ध्य–त्वाय । पशुः । वै । एषः । यत् । अग्निः । अन्नम् । पशवः ।

एषः । खलु । वै । अग्निः । यत् । पशुशीर्.षाणीति

पशु–शीर्.षाणि । यम् । कामयेत । कनीयः । अस्य ।

अन्नम् । **41 (50)**

**<u>TS 5.7.10.3</u>**

स्यादिति सन्तरां तस्य पशुशीर्.षाण्युप दद्ध्यात् कनीय एवास्यान्नं

भवति यं कामयेत समावदस्यान्न॑ स्यादिति मद्ध्यत–स्तस्योप

दद्ध्याथ् समाव–देवास्यान्नं भवति यं कामयेत भूयो ऽस्याऽन्न॑

स्यादित्यन्तेषु तस्य व्युदूह्योप दद्ध्यादन्तत एवास्मा अन्नमव रुन्धे

भूयो ऽस्यान्नं भवति ( ) ॥ **42**

**TS 5.7.10.3 - Padam**

स्यात् । इति । सन्तरामिति सं – तराम् । तस्य । पशुशीर्.षाणीति पशु – शीर्.षाणि । उपेति । दद्ध्यात् । कनीयः । एव । अस्य । अन्नम् । भवति । यम् । कामयेत । समावत् । अस्य । अन्नम् । स्यात् । इति । मद्ध्यतः । तस्य । उपेति । दद्ध्यात् । समावत् । एव । अस्य । अन्नम् । भवति । यम् । कामयेत । भूयः । अस्य । अन्नम् । स्यात् । इति । अन्तेषु । तस्य । व्युदूह्येति वि – उदूह्य । उपेति । दद्ध्यात् । अन्ततः । एव । अस्मै । अन्नम् । अवेति । रुन्धे । भूयः । अस्य । अन्नम् । भवति ( ) ॥ **42 (50)**

*(एन– मस्यान्नं – भूयोऽस्याऽन्नं भवति) (A10)*

**TS 5.7.11.1**

स्तेगान् द८ष्ट्राभ्यां मण्डूकान् जंभ्येभिरादकां–खादेनोर्ज८ं स८ं सूदेनारण्यं जांबीलेन मृदं बर्स्वेभिः शर्कराभि–रवका–मवकाभिः शर्करा–मुथ्सादेन जिह्वा–मवक्रन्देन तालु८ं सरस्वतीं जिह्वाग्रेण ॥ **43**

**TS 5.7.11.1 - Padam**

स्तेगान् । द॒ष्ट्राभ्याम् । मण्डूकान् । जंभ्येभिः । आदकाम् ।

खादेन । ऊर्जम् । स॒ꣳसूदेनेति सं–सूदेन । अरण्यम् । जांबीलेन ।

मृदम् । बर्स्वेभिः । शर्कराभिः । अवकाम् । अवकाभिः । शर्कराम् ।

उथ्सादेनेत्युत् – सादेन । जिह्वाम् । अवक्रन्देनेत्यव – क्रन्देन ।

तालुम् । सरस्वतीम् । जिह्वाग्रेणेति जिह्वा – अग्रेण ॥ **43 (22)**

*(स्तेगान् – द्वाविꣳशतिः) (A11)*

**TS 5.7.12.1**

वाजꣳ हनूभ्यामप आस्येनाऽऽदित्या–ञ्छमश्रुभि–रुपयाम–

मधरेणोष्ठेन सदुत्तरेणान्तरेणा–नूकाशं प्रकाशेन बाह्यꣳ स्तनयित्नुं

निर्बाधेन सूर्याग्नी चक्षुर्भ्यां ँविद्युतौ कनानकाभ्या–मशनिं

मस्तिष्केण बलं मज्जभिः ॥ **44**

**TS 5.7.12.1 - Padam**

वाजम् । हनूभ्यामिति हनु – भ्याम् । अपः । आस्येन । आदित्यान् ।

श्मश्रुभिरिति श्मश्रु – भिः । उपयाममित्युप – यामम् । अधरेण ।

ओष्ठेन । सत् । उत्तरेणेत्युत् – तरेण । अन्तरेण ।

अनूकाशमित्यनु – काशम् । प्रकाशेनेति प्र – काशेन । बाह्यम् ।

स्तनयित्नुम् । निर्बाधेनेति निः–बाधेन । सूर्याग्नी इति सूर्य–अग्नी ।

चक्षुर्भ्यामिति चक्षुः – भ्याम् । विद्युताविति वि – द्युतौ ।

कनीनकाभ्याम् । अशनिम् । मस्तिष्केण । बलम् । मज्जभिरिति

मज्ज – भिः ॥ **44 (25)** ***(वाजं पञ्चविꣳशतिः) (A12)***

**TS 5.7.13.1**

कूर्मा–ञ्छफै–रच्छलाभिः कपिञ्जलान्थ्साम कुष्ठिकाभिर्जवं

जङ्घाभि–रगदं जानुभ्यां ँवीर्यं कुहाभ्यां भयं प्रचालाभ्यां

गुहोपपक्षाभ्या–मश्विनावꣳसाभ्या–मदितिꣳ शीर्ष्णा निर्.ऋतिं

निर्जाल्मकेन शीर्ष्णा ॥ **45**

**TS 5.7.13.1 - Padam**

कूर्मान् । शफैः । अच्छलाभिः । कपिञ्जलान् । साम । कुष्ठिकाभिः ।

जवम् । जङ्घाभिः । अगदम् । जानुभ्यामिति जानु–भ्याम् । वीर्यम् ।

कुहाभ्याम् । भयम् । प्रचालाभ्यामिति प्र – चालाभ्याम् । गुहा ।

उपपक्षाभ्यामित्युप – पक्षाभ्याम् । अश्विनौ । अꣳसाभ्याम् । अदितिम् । शीर्ष्णा । निर्.ऋतिमिति निः – ऋतिम् । निर्जाल्मकेनेति निः–जाल्मकेन । शीर्ष्णा ॥ **45 (23)** *(कूर्मान्–त्रयोविꣳशतिः) (A13)*

**TS 5.7.14.1**

योक्त्रं गृद्ध्राभिर्युग–मानतेन चित्तं मन्याभिः संक्रोशान् प्राणैः प्रकाशेन त्वचं पराकाशेनान्तरां मशकान् केशै–रिन्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन रथ–मुष्णिहाभिः ॥ **46**

**TS 5.7.14.1 - Padam**

योक्त्रम् । गृद्ध्राभिः । युगम् । आनतेनेत्या – नतेन । चित्तम् । मन्याभिः । संक्रोशानिति सं – क्रोशान् । प्राणैरिति प्र – अनैः । प्रकाशेनेति प्र – काशेन । त्वचम् । पराकाशेनेति परा – काशेन । अन्तराम् । मशकान् । केशैः । इन्द्रम् । स्वपसेति सु – अपसा । वहेन । बृहस्पतिम् । शकुनिसादेनेति शकुनि – सादेन । रथम् । उष्णिहाभिः ॥ **46 (21)**

*(योक्त्र – मेकविꣳशतिः) (A14)*

**TS 5.7.15.1**

मित्रावरुणौ श्रोणीभ्यामिन्द्राग्नी शिखण्डाभ्या–मिन्द्राबृहस्पती

ऊरुभ्यामिन्द्राविष्णू अष्ठीवद्भ्या॰ सवितारं पुच्छेन

गन्धर्वाञ्छेपेना–प्सरसो मुष्काभ्यां पवमानं पायुना पवित्रं

पोत्राभ्यामाक्रमण॰ स्थूराभ्यां प्रतिक्रमणं कुष्ठाभ्यां ॥ **47**

**TS 5.7.15.1 - Padam**

मित्रावरुणाविति मित्रा – वरुणौ । श्रोणीभ्यामिति श्रोणि – भ्याम् ।

इन्द्राग्नी इतीन्द्र – अग्नी । शिखण्डाभ्याम् ।

इन्द्राबृहस्पती इतीन्द्रा – बृहस्पती । ऊरुभ्यामित्यूरु – भ्याम् ।

इन्द्राविष्णू इतीन्द्रा – विष्णू । अष्ठीवद्भ्यामित्यष्ठीवत् – भ्याम् ।

सवितारम् । पुच्छेन । गन्धर्वान् । शेपेन । अप्सरसः ।

मुष्काभ्याम् । पवमानम् । पायुना । पवित्रम् । पोत्राभ्याम् ।

आक्रमणमित्या – क्रमणम् । स्थूराभ्याम् ।

प्रतिक्रमणमिति प्रति – क्रमणम् । कुष्ठाभ्याम् ॥ **47 (22)**

*(मित्रावरुणौ – द्वाविꣳशतिः) (A15)*

**TS 5.7.16.1**

इन्द्रस्य क्रोडो ऽदित्यै पाजस्यं दिशां जत्रवो जीमूतान्

हृदयौपशाभ्या–मन्तरिक्षं पुरितता नभ उदर्येणेन्द्राणीं प्लीह्ना

वल्मीकान् क्लोम्ना गिरीन् प्लाशिभिः समुद्रमुदरेण वैश्वानरं

भस्मना ॥ **48**

**TS 5.7.16.1 - Padam**

इन्द्रस्य । क्रोडः । अदित्यै । पाजस्यम् । दिशाम् । जत्रवः ।

जीमूतान् । हृदयौपशाभ्यामिति हृदय – औपशाभ्याम् । अन्तरिक्षम् ।

पुरितता । नभः । उदर्येण । इन्द्राणीम् । प्लीह्ना । वल्मीकान् ।

क्लोम्ना । गिरीन् । प्लाशिभिरिति प्लाशि–भिः । समुद्रम् । उदरेण ।

वैश्वानरम् । भस्मना ॥ **48 (22)**

*(इन्द्रस्य – द्वाविꣳशतिः) (A16)*

**TS 5.7.17.1**

पूष्णो वनिष्ठु–रन्धाहेः स्थूरगुदा सर्पान् गुदाभिर्. ऋतून् पृष्टीभिर्दिवं

पृष्ठेन वसूनां प्रथमा कीकसा रुद्राणां द्वितीया ऽऽदित्यानां तृतीया

ऽङ्गिरसां चतुर्थी साद्ध्यानां पञ्चमी विश्वेषां देवानाꣳ षष्ठी ॥ **49**

**TS 5.7.17.1 - Padam**

पूष्णः । वनिष्ठुः । अन्धाहेरित्यन्ध–अहेः । स्थूरगुदेति स्थूर – गुदा ।
सर्पान् । गुदाभिः । ऋतून् । पृष्टीभिरिति पृष्टि – भिः । दिवम् ।
पृष्ठेन । वसूनाम् । प्रथमा । कीकसा । रुद्राणाम् । द्वितीया ।
आदित्यानाम् । तृतीया । अङ्गिरसाम् । चतुर्थी । साद्ध्यानाम् ।
पञ्चमी । विश्वेषाम् । देवानाम् । षष्ठी ॥ **49 (24)**

*(पूष्ण – श्चतुर्विꣳशतिः) (A17)*

**TS 5.7.18.1**

ओजो ग्रीवाभिर् निर्.ऋति–मस्थभि–रिन्द्रꣳ स्वपसा वहेन रुद्रस्य
विचलः स्कन्धो ऽहोरात्रयोर्द्वितीयो ऽर्द्धमासानां तृतीयो मासां
चतुर्थ ऋतूनां पञ्चमः सँवथ्सरस्य षष्ठः ॥ **50**

**TS 5.7.18.1 - Padam**

ओजः । ग्रीवाभिः । निर्.ऋतिमिति निः–ऋतिम् ।
अस्थभिरित्यस्थ–भिः । इन्द्रम् । स्वपसेति सु – अपसा ।
वहेन । रुद्रस्य । विचल इति वि – चलः । स्कन्धः ।

अहोरात्रयोरित्यहः – रात्रयोः । द्वितीयः ।

अर्द्धमासानामित्यर्द्ध – मासानाम् । तृतीयः । मासाम् । चतुर्थः ।

ऋतूनाम् । पञ्चमः । सँवथ्सरस्येति सं – वथ्सरस्य ।

षष्ठः ॥ **50 (20)** *(ओजो – वि॒ꣳशतिः) (A18)*

**TS 5.7.19.1**

आनन्दं नन्दथुना कामं प्रत्यासाभ्यां भयꣳ शितीमभ्यां प्रशिषं प्रशासाभ्याꣳ सूर्याचन्द्रमसौ वृक्याभ्याꣳ श्यामशबलौ मतस्नाभ्याꣳ व्युष्टिꣳ रूपेण निम्रुक्ति–मरूपेण ॥ **51**

**TS 5.7.19.1 - Padam**

आनन्दमित्या – नन्दम् । नन्दथुना । कामम् । प्रत्यासाभ्यामिति प्रति – आसाभ्याम् । भयम् । शितीमभ्यामिति शितीम – भ्याम् । प्रशिषमिति प्र – शिषम् । प्रशासाभ्यामिति प्र – शासाभ्याम् । सूर्याचन्द्रमसाविति सूर्या – चन्द्रमसौ । वृक्याभ्याम् । श्यामशबलाविति श्याम – शबलौ । मतस्नाभ्याम् ।

व्युष्टिमिति वि–उष्टिम् । रूपेण । निम्रुक्तिमिति नि–म्रुक्तिम् ।
अरूपेण ॥ **51 (16)** *(आनन्दं – षोडश) (A19)*

**TS 5.7.20.1**

अहर्मांसेन रात्रिं पीवसाऽपो यूषेण घृतꣳ रसेन श्यां ँवसया
दूषीकाभि–र्ह्रादुनि–मश्रुभिः पृष्वां दिवꣳ रूपेण नक्षत्राणि प्रतिरूपेण
पृथिवीं चर्मणा छवीं छव्योपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय
स्वाहा ॥ **52**

**TS 5.7.20.1 - Padam**

अहः । मांसेन । रात्रिम् । पीवसा । अपः । यूषेण । घृतम् । रसेन ।
श्याम् । वसया । दूषीकाभिः । ह्रादुनिम् । अश्रुभिरित्यश्रु – भिः ।
पृष्वाम् । दिवम् । रूपेण । नक्षत्राणि । प्रतिरूपेणेति प्रति – रूपेण ।
पृथिवीम् । चर्मणा । छवीम् । छव्या । उपाकृतायेत्युप – आकृताय ।
स्वाहा । आलब्धायेत्या – लब्धाय । स्वाहा । हुताय ।
स्वाहा ॥ **52 (28)**

*(अहर् – ष्टाविꣳशतिः) (A20)*

**TS 5.7.21.1**

अग्नेः पक्षतिः सरस्वत्यै निपक्षतिः सोमस्य तृतीया ऽपां चतुर्थ्योषधीनां पञ्चमी सँवथ्सरस्य षष्ठी मरुता२ँ सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशमीन्द्रस्यैकादशी विश्वेषां देवानां द्वादशी द्यावापृथिव्योः पार्श्वं यमस्य पाटूरः ॥ **53**

**TS 5.7.21.1 - Padam**

अग्नेः । पक्षतिः । सरस्वत्यै । निपक्षतिरिति नि–पक्षतिः । सोमस्य । तृतीया । अपाम् । चतुर्थी । ओषधीनाम् । पञ्चमी । सँवथ्सरस्येति सं – वथ्सरस्य । षष्ठी । मरुताम् । सप्तमी । बृहस्पतेः । अष्टमी । मित्रस्य । नवमी । वरुणस्य । दशमी । इन्द्रस्य । एकादशी । विश्वेषाम् । देवानाम् । द्वादशी । द्यावापृथिव्योरिति द्यावा–पृथिव्योः । पार्श्वम् । यमस्य । पाटूरः ॥ **53 (29)** *(अग्ने–रेकान्नत्रि२ँशत्) (A21)*

**TS 5.7.22.1**

वायोः पक्षतिः सरस्वतो निपक्षति–श्चन्द्रमस–स्तृतीया नक्षत्राणां चतुर्थी सवितुः पञ्चमी रुद्रस्य षष्ठी सर्पाणा२ँ सप्तम्यर्यम्णो ऽष्टमी

त्वष्टुर्नवमी धातुर्दशमीन्द्राण्या एकादश्यदित्यै द्वादशी द्यावापृथिव्योः पार्श्वँ यम्यै पाटूरः ॥ **54**

**TS 5.7.22.1 - Padam**

वायोः । पक्षतिः । सरस्वतः । निपक्षतिरिति नि – पक्षतिः । चन्द्रमसः । तृतीया । नक्षत्राणाम् । चतुर्थी । सवितुः । पञ्चमी । रुद्रस्य । षष्ठी । सर्पाणाम् । सप्तमी । अर्यम्णः । अष्टमी । त्वष्टुः । नवमी । धातुः । दशमी । इन्द्राण्याः । एकादशी । अदित्यै । द्वादशी । द्यावापृथिव्योरिति द्यावा – पृथिव्योः । पार्श्वम् । यम्यै । पाटूरः ॥ **54 (28)**

*(वायो – रष्टाविꣳशतिः) (A22)*

**TS 5.7.23.1**

पन्थामनूवृग्भ्याꣳ सन्ततिꣳ स्नावन्याभ्याꣳ शुकान् पित्तेन हरिमाणं यक्ना हलीक्ष्णान् पापवातेन कूश्माञ्छकभिः शवर्तानूवद्ध्येन शुनो विशसनेन सर्पान् ँलोहितगन्धेन वयाꣳसि पक्वगन्धेन पिपीलिकाः प्रशादेन ॥ **55**

**TS 5.7.23.1 - Padam**

पन्थाम् । अनूवृग्भ्यामित्यनूवृक् – भ्याम् । सन्ततिमिति सं–ततिम् ।
स्नावन्याभ्याम् । शुकान् । पित्तेन । हरिमाणम् । यक्ना । हलीक्ष्णान् ।
पापवातेनेति पाप – वातेन । कूश्मान् । शकभिरिति शक – भिः ।
शवर्तान् । ऊवद्ध्येन । शुनः । विशसनेनेति वि – शसनेन ।
सर्पान् । लोहितगन्धेनेति लोहित – गन्धेन । वयाꣳसि ।
पक्वगन्धेनेति पक्व – गन्धेन । पिपीलिकाः ।
प्रशादेनेति प्र – शादेन ॥ **55 (22)**

*(पन्थां – द्वाविꣳशतिः) (A23)*

**TS 5.7.24.1**

क्रमै–रत्यक्रमीद्–वाजी विश्वैर्देवैर्यज्ञियैः सँविदानः ।
स नो नय सुकृतस्य लोकं तस्य ते वयꣳ स्वधया मदेम ॥ **56**

**TS 5.7.24.1 - Padam**

क्रमैः । अतीति । अक्रमीत् । वाजी । विश्वैः । देवैः । यज्ञियैः ।
सँविदान इति सं – विदानः ॥ सः । नः । नय । सुकृतस्येति

सु – कृतस्य । लोकम् । तस्य । ते । वयम् । स्वधयेति स्व–धया । मदेम ॥ 56 (18) *(क्रमै – रष्टादश) (A24)*

**TS 5.7.25.1**

द्यौ–स्ते पृष्ठं पृथिवी सधस्थ–मात्मा ऽन्तरिक्ष॑ समुद्रो योनिः सूर्यस्ते चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं मासाश्चार्द्धमासाश्च पर्वाण्यृतवो ऽङ्गानि सँवथ्सरो महिमा ॥ 57

**TS 5.7.25.1 - Padam**

द्यौः । ते । पृष्ठम् । पृथिवी । सधस्थमिति सध – स्थम् । आत्मा । अन्तरिक्षम् । समुद्रः । योनिः । सूर्यः । ते । चक्षुः । वातः । प्राण इति प्र – अनः । चन्द्रमाः । श्रोत्रम् । मासाः । च । अर्द्धमासा इत्यर्द्ध – मासाः । च । पर्वाणि । ऋतवः । अङ्गानि । सँवथ्सर इति सं – वथ्सरः । महिमा ॥ 57 (25)

*(द्यौ – पञ्चविꣳशतिः) (A25)*

**TS 5.7.26.1**

अग्निः पशुरासीत् तेनायजन्त स एतं ँलोकमजयद्–यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथाव जिघ्र वायुः पशुरासीत् तेनायजन्त स

एतं ँल्लोकमजयद्–यस्मिन् वायुः स ते लोकस्तस्मात्
त्वा ऽन्त–रेष्यामि यदि नावजिघ्रस्यादित्यः पशुरासीत् तेनायजन्त
स एतं ँल्लोकमजयद् यस्मि–( )–न्नादित्यः स ते लोकस्तं जेष्यसि
यद्यवजिघ्रसि ॥ 58

**TS 5.7.26.1 - Padam**

अग्निः । पशुः । आसीत् । तेन । अयजन्त । सः । एतम् । लोकम् ।
अजयत् । यस्मिन्न् । अग्निः । सः । ते । लोकः । तम् । जेष्यसि ।
अथ । अवेति । जिघ्र । वायुः । पशुः । आसीत् । तेन । अयजन्त ।
सः । एतम् । लोकम् । अजयत् । यस्मिन्न् । वायुः । सः । ते ।
लोकः । तस्मात् । त्वा । अन्तः । एष्यामि । यदि । न ।
अवजिघ्रसीत्यव–जिघ्रसि । आदित्यः । पशुः । आसीत् । तेन ।
अयजन्त । सः । एतम् । लोकम् । अजयत् । यस्मिन्न् ( ) ।
आदित्यः । सः । ते । लोकः । तम् । जेष्यसि । यदि ।
अवजिघ्रसीत्यव – जिघ्रसि ॥ **58 (58)** ***(यस्मि – न्नष्टौ च) (A26)***

===============

**Prasna Korvai with starting Padams of 1 to 26 Anuvaakams :-**

(यो वा अयथादेवत – न्त्वामग्न – इन्द्रस्य – चित्तिं – ँयथा वै – वयो वै – यदाकूताद् – यास्ते अग्ने – मयि गृह्णामि – प्रजापतिः सोऽस्माथ् – स्तेगान् – वाजं – कूर्मान् – योक्त्रं – मित्रावरुणा – विन्द्रस्य – पूष्ण – ओज – आनन्द – मह – रग्ने – र्वायोः – पन्थां – क्रमै – द्यौस्ते – ऽग्निः पशुरासीथ् – षड्विꣳशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(यो वा – एवाऽऽहुति – मभवन् – पथिभि – रवरुध्या – ऽऽनन्द – मष्टौ पञ्चशत् )

**First and Last Padam of Seventh Prasnam of 5th Kandam :-**

(यो वा अयथादेवतं – ँयद्यवजिघ्रसि )

**Kaanda Korvai with starting Padams of 7 Prasanams of Kandam 5:-**

( सावित्राणि – विष्णुमुखा – उथ्सन्नयज्ञो – देवासुरा – यदेकेन – हिरण्यवर्णा – यो वा– सप्त )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमकाण्डे

सप्तमः प्रश्नः समाप्तः ॥

॥ इति पञ्चमं काण्डं ॥

## Details of Panchati and Padam for Kandam 5, Prasanam 7 (TS 5.7)

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 3 | 148 |
| Anuvakam 2 | 5 | 275 |
| Anuvakam 3 | 4 | 196 |
| Anuvakam 4 | 4 | 207 |
| Anuvakam 5 | 7 | 345 |
| Anuvakam 6 | 6 | 303 |
| Anuvakam 7 | 3 | 164 |
| Anuvakam 8 | 3 | 166 |
| Anuvakam 9 | 4 | 225 |
| Anuvakam 10 | 3 | 150 |
| Anuvakam 11 | 1 | 22 |
| Anuvakam 12 | 1 | 25 |
| Anuvakam 13 | 1 | 23 |
| Anuvakam 14 | 1 | 21 |
| Anuvakam 15 | 1 | 22 |
| Anuvakam 16 | 1 | 22 |
| Anuvakam 17 | 1 | 24 |
| Anuvakam 18 | 1 | 20 |
| Anuvakam 19 | 1 | 16 |
| Anuvakam 20 | 1 | 28 |
| Anuvakam 21 | 1 | 29 |
| Anuvakam 22 | 1 | 28 |
| Anuvakam 23 | 1 | 22 |
| Anuvakam 24 | 1 | 18 |
| Anuvakam 25 | 1 | 25 |
| Anuvakam 26 | 1 | 58 |
| Total → | 58 | 2582 |

Notes:

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**